International Journal of Sanskrit Research 2022; 8(5): 94-95

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(5): 94-95
© 2022 IJSR
www.anantaajournal.com
Received: 13-07-2022
Accepted: 17-08-2022

**डॉ0 संतोष कुमार पाठक**
बेलाशंकर, वार्ड नं.– 3, निकट– पी. टी.सी., लालबाग, दरभंगा, बिहार, भारत

**Corresponding Author:**
**डॉ0 संतोष कुमार पाठक**
बेलाशंकर, वार्ड नं.– 3, निकट– पी. टी.सी., लालबाग, दरभंगा, बिहार, भारत

# तन्वादि द्वादशभावानां संक्षिप्तपरिचयः

**डॉ0 संतोष कुमार पाठक**

**सारांशः**
भारतीय ज्योतिष वाङ्ग्मये यत्जन्मपत्रं निर्मितं भवति तस्मिन जन्मपत्रे भावानं स्थापना राशिक्रमेण भवति। यदि लग्नं 0/1/0/0 अर्थात् मेष राशेः एकस्मिन्नंशोपरि यदि भवेतर्हि मेष राशौ एकोन त्रिशत् (29) अंशोपरि स्थितं ग्रहमपि प्रथम (तनु) भावे एव भविष्यति। उक्त–राशौ ग्रहं–कुत्रापि यदि स्थितं भवेत् तनुभावस्यैव संज्ञा जाता किन्तु कालान्तरे एकं युक्तिपूर्ण नवीनं विचारमुदितमभूत यत लग्नस्पष्टं प्रथम भावस्य केन्द्रः विद्यते। अन्य मतानुसारेण प्रथम भावस्यारम्भ स्थानं विद्यते कारणादस्मात् भावस्यास्य केन्द्र विन्दुतः पञ्चदशांशः। ($15^0$) अग्रे एवं पंञ्चदशांशः पार्श्वस्य भाग प्रथमं भावं तनु संज्ञा ज्ञातब्या।

**कूट शब्दः** भारतीय ज्योतिष, तन्वादि द्वादशभावानां, राशिक्रमेण

## प्रस्तावना

अपि चान्यमतानुसारेण लग्नस्पष्टं प्रथमभावस्यारम्भ स्थानम्। अतएव अत्रातः त्रिशदंश ($30^0$) पर्यन्तं प्रथमं भावमेव कथितम्। उदाहरणार्थ कश्चित् जातकस्य जन्म मेष राशे ($27^0$) सप्तदशांशोपरि अर्थात् 0/27/0/0 विद्यते। अत्र विभिन्नैः मतै भावस्य संज्ञा का भविष्यति प्रथमं भावं मेष राशिः वर्त्तते, अतएव $0^0$ अंशतः ($30^0$) त्रिशदंश पर्यन्तं प्रथमं भावम्। तनुभावं यदि लग्न स्पष्टं केन्द्रं मन्यते तदा 0/$27^0$/0/0 राशितः ($15^0$) पञ्चदशांशमग्रे एवं एतदेव पश्चात् द्वादशांश मेष राशितः। $12^0$ अंशपर्यन्तं (बृषराशि–पर्यन्तं) तनुभावस्य क्षेत्रं भविष्यति। एवमेव मन्यते यदि लग्नस्पष्टं तनुभावस्यारम्भ स्थानं तदा सप्तविंशत्यंशतः मेष राशितः ($26^0$) षड़विंशत्यंशे वृष राशि पर्यन्तं तनुभावस्य क्षेत्रं भविष्यति भारतीय ज्योतिषशास्त्रे जन्मपत्रियां ग्रहाणां स्थिति क्रमः पाश्चात्य विचारात् भिन्नः वर्त्तते।

## दशम भाव साधनम्

स्वकीये निर्दिष्ट समयोपरि खगोलस्य यदंशं पूर्व क्षितिजोपरि तिष्ठति तदेव लग्न स्पष्टं ज्ञायते। ऊर्ध्वक्षितिजोपरि (शिरोपरि) खगोलस्य यदंशं भवति तदेव दशम भाव स्पष्टं दशम भावस्य केन्द्र स्थानं वा भविष्यति। भाव स्पष्टस्य एका क्रिया जटिला किन्त्वपरा विधिः लग्नसारिण्याः सरला भवति। अनया रीत्या लग्न सारिणी माध्यमेन सूर्यस्य राश्यंशतुल्य– कोष्ठकात् प्राप्तेषु घटीपलेषु स्वकीयमिष्टकालं योज्य, योगस्य कला विकलायां पञ्चदशकला शोधयित्वा, शेषं कला–विकला यत्रसारिण्यां प्राप्तं भवति तदेव दशम भाव स्पष्टम्।

अस्मिन् दशम भावे षड़राशि योजनेन चतुर्थभावं स्पष्टं भवति। भावसाधने ध्रुवकस्यावश्यकता भवति। एतदर्थं चतुर्थ–भाव स्पष्टे लग्नस्पष्टं शोधनं कार्यमिति। शेषं षड्भिर्भक्ते सति लब्धि ध्रुवकं भवति। ध्रुवकोऽयं लग्नस्पष्टे योजिते सति लग्नस्य सन्धि स्यात् तनुभावस्यान्तिमं स्थानं भवति (धनाभावस्यारम्भ विन्दुः)।

पश्चात् तनुभाव सन्धौ क्रमशः ध्रुवकं योजनेन धनभावं, धनभावसन्धिः, तृतीयभावं तृतीयभाव सन्धि एवं चतुर्थभावं भवति। एवं प्रकारेण

सहज भावं (तृतीय भावं) + 2 राशि त्र पंचम भाव् (पुत्रभाव)
धन भावं + 4 राशि त्र रिपुभाव (षष्ठ भाव)
सहज सन्धि + 1 राशि त्र सुखभाव सन्धिः।
धनभाव सन्धि + 3 राशि त्र पुत्रभाव सन्धि।
तनुभाव सन्धि + 5 राशि त्र रिपु संधिः।
तनुभाव + 6 राशि त्र जाया भाव (पति भाव)
धन भाव + 6 राशि त्र आयुभाव (अष्टम भाव)
सहज भाव + 6 राशि त्र धर्मभावः।
सुखभाव + 6 राशि त्र कर्म भाव (दशम भाव)

सुत भाव + 6 राशि त्र लाभ भाव।
रिपु भाव + 6 राशि त्र व्यय भाव
तनुभाव सन्धि + 6 राशि त्र जाया भाव सन्धिः।
धन भाव सन्धि + 6 राशि त्र आयु भाव सन्धि।
सहज भाव सन्धि + 6 राशि त्र धर्म भाव सन्धिः।
सुख भाव सन्धि + 6 राशि त्र कर्म भाव सन्धिः।
सुत भाव सन्धि + 6 राशि त्र लाभ भाव सन्धिः।
रिपु भाव सन्धि + 6 राशि त्र व्यय भाव सन्धिः।
प्रकारेणानेन द्वादशभावसन्धि सहित स्पष्टं भवति।

उदाहरणार्थ कल्प्यते यत् सूर्यस्पष्ट त्र 6/23
इष्टकालः त्र 5/56

लग्न सारिण्यनुसारेण स्पष्टः 6/23 सूर्योपरि त्र 38/54
इस्टकाल योजितेसनि त्र. 5/56
44/50
नियमानुसारेण 15 बिकला शोधिते सति – 15/00
दशमलग्न सारिण्यामवलोकने सति – 29/50
कन्याया षडंशोपरि प्राप्तम्।
अतएव 5/6/29/50 दशम लग्नस्पष्टः।
अस्मिन दशम लग्ने षड़राशि योजिते सति

5/6/29/50
+ 6/01/0/0
11/6/29/50 चतुर्थस्पष्टः।

अस्मिन चतुर्थ स्पष्टे लग्नस्पष्टं शोधितम्। लग्नस्पष्टमत्र 7/24/44/50 बिद्यते। (11/6/29/50–7/24/44/5) त्र 3/11/45/0 शेषम्।
नियमानुसारेण षडभिर्भक्ते सति 3/11/45/0 / 6 त्र 0/16/57/30 ध्रुवकः अभवत्।
लग्नस्पष्टे ध्रुवके योजिते सतित्रलग्नस्पष्टं त्र7/24/44/50
+ 0/16/57/30 ध्रुवकः
त्र 8/11/42/20
8/11/42/20 त्र तनुभावसंधि
+ 0/16/57/30
त्र 8/28/39/50 धनभाव
+ 0/16/57/30
9/15/37/20 धनभाव संधि
0/16/57/30
10/2/34/50 सहजभाव। एवं प्रकारेण ससन्धयः भावास्पष्टा भवन्ति।

अथ द्वादशभावं ससन्धयः।।

| भावा | तन | धन | सहज | सुख | सुत | रिपु | जाया | आयु | धर्म | कर्म | आय | व्यय |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| राशि | 7 | 8 | 10 | 11 | 0 | 0 | 1 | 2 | 4 | 5 | 6 | 6 |
| अंश | 24 | 28 | 2 | 6 | 2 | 28 | 24 | 28 | 2 | 6 | 2 | 28 |
| कला | 44 | 39 | 34 | 29 | 34 | 39 | 44 | 39 | 34 | 29 | 34 | 39 |
| विकला | 50 | 50 | 50 | 50 | 50 | 50 | 50 | 50 | 50 | 50 | 50 | 50 |
| सन्धयः | | | | | | | | | | | | |
| राशि | 8 | 9 | 10 | 11 | 0 | 1 | 2 | 3 | 4 | 5 | 6 | 7 |
| अंश | 11 | 15 | 19 | 19 | 15 | 11 | 11 | 15 | 19 | 19 | 15 | 11 |
| कला | 42 | 37 | 32 | 32 | 37 | 42 | 42 | 37 | 32 | 32 | 37 | 42 |
| विकला | 20 | 20 | 20 | 20 | 20 | 20 | 20 | 20 | 20 | 20 | 20 | 20 |

द्वादशभाव साधनक्रमे लग्नानयनदशमलग्नयोशवश्यकता वरीवर्ति। कारणादस्मादत्र एतयोर्द्वयोर्साधनं प्रस्तूयते।
किन्नाम तावत् लग्नमिति प्रथममुच्यते। लगतीति लग्नमिति व्युत्पत्याऽभीष्टकाले क्रान्तिवृतस्य यः प्रदेशः उदयक्षितिजे लगति तदेव राश्यादिकं लग्नम्। तथैवाह भास्करः – "यत्रलग्नपमण्डलं कुजे तद गृहादृयमिह लग्नमुच्यते प्राचि"।
एवमेव अभीष्टकाले क्रान्तिवृत्तस्य यः प्रदेशः ऊर्ध्वयाम्योत्तरबृते लगतितदेव राश्यादिकं दशमं लग्नं भवति। कथं दशमविभागस्यास्म्भ ऊर्ध्वयाम्योतरबृत एवभवति? बस्तुतः स्वक्षितिजक्रान्तिवृतयोः पूर्वसम्पातस्थ प्रथम। लग्नसंज्ञात्वात् पूर्वसंस्थया निवेक्षितेषु क्रान्तिवृत्तीय द्वादशराशि विभागेषु दशमविभागस्यारम्भ ऊर्ध्वयाम्योतर बृत एव भवतीति याम्योतरापमवत्तयो– रूर्ध्वसम्पातो दशम लग्नमित्यन्वर्थकंमेव नाम ।।
अस्तु तावत प्रथमं दशम लग्न साधन प्रकारमुपस्थाप्यते। विषयेऽस्मिन् भगवतः श्री सूर्यस्य बचनम् यथा –

प्राकपश्चान्नतनाडीभिस्तमाल्लंकोदयासुभिः।
भानौ क्षयधने कृत्वा मध्यलग्नं तदा भवेत्।।

प्राक् पश्चाच्य या नत नाड्यस्ताभिः अर्थात् ऊर्ध्वयाम्योत्तरवृततो रविः प्राककपाले यावत् काल प्रमाणेनान्तरितो भवति तावत्यः पाङनतनाड्यः तथा परकपाले यावत्कालमानेनान्तरितस्तावत्यः परनतनाडयः ताभिः पूर्वनतनाडीभिः परनत् नाड़ीभिर्वा, एवं लंकादेशीय राशीनामुदयासुभिश्चं लग्नसाधन प्रकारतः यत् फलं भवेत् तत् सूर्ये अर्थात तात्कालिक सायनार्के पूर्वनतकाले लब्धं फलं क्षयं, परनतकाले लब्धं फलं धनं कृत्वा यद् भवति तदेव अभीष्टकाले मध्यलग्नं (दशमलग्नं) भवेत्।
भास्कराचार्यः "मध्यलग्नमिह दक्षिणोत्तरे' इतिकथयति कारणादस्मात् तत्र दशमलग्ने याम्योत्तरवृत्तमेव क्षितिजं भवति। अतएव क्षितिजा–देर्ककेन्द्रावधिः अहोरात्रे दृष्टकालस्तिष्ठति। तेन याम्योत्तरवृत्तात् रविपर्यन्तमहोरात्रे वा रविगतध्रुवप्रोतवृत्त नाड़ी मण्डले यत्र लगति तस्मात् स्थानात् याम्यो–त्तरावधिः नाड़ीवृत्ते पूर्णापरमतसंज्ञकः कालः। अस्मिन काले के के तिष्ठति के के अवयवा सन्ति ?
अत्र पूर्वनते रवेर्भुक्तसनः तत्पृष्ठराश्युद्यासवो दशमलग्नस्य भोग्यासवश्च नाड़ीवृत्ते भवन्ति। अतएव तत्सम्बन्धिनो रवेर्भुक्तांशाः तत्पृष्ठ राशयो दशमलग्नभोग्यांशश्च क्रान्तिवृते रविदशमलग्नयोरन्तरे तिष्ठन्ती यदि एतां आनीय रवितो विशोधयेत्तदा दशमलग्नं स्यात् अर्कस्याग्र विद्य मानत्वात्।
एवं प्रकारेण परकपाले अर्थात् पश्चिमनते रवेर्भोग्यांशाः तदग्रराशयोदशमलग्नभोग्यांशाश्च क्रान्तिवृत्ते रविदशमलग्नान्तरे भवन्ति। अतो रविमध्ये एषां योगेन दशमलग्नं भवतीत्यापि स्पष्टमेव। समयेऽस्मिन् अर्कस्य मध्य लग्नात् पृष्ठगतत्वात् एतादृशं भवति।

**संदर्भा :**


1. सूर्यसिद्धा. त्रि.प्र.अ.श्लो. 46–48।
2. संकलितं सू. सिं.त्रि.प्र.अ.श्लो. 49।
3. सिद्धा. शि. त्रिप्रश्न. श्लो.
4. सू. सिद्धा. त्रि.
5. हायनरत्न उत्तरार्द्ध अ. 6 पृ.1